-उ.न.- ९६

स्पे स्कूल

आजिक

खोधी:

॥ मधुपर्कविधिः ॥

3312

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

॥ अथमधुपर्कलिपिः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

श्रीगणेशायनमः॥ ॥ॐ ॥ऋग्वेदस्यआश्वलायनसूत्रस्यप्र
थमोध्यायोतिचतुर्विंशतिमखंडेमधुपर्कविधीःनारायण
णवृत्तिसहिताप्रारंभः॥ ॥ॐ ऋत्विजो॰हृत्वा॥ इत्यादि
स्यर्थः। स्नातका॰ताय॥ उपस्थितायेतिकृतसमावर्तनाय
तस्मिन्नहनिगृहानभ्यागतायविवाहार्थिनेच। राज्ञेच॥ उपस्थि
ताय॥ आचार्य॰लानांच॥ आचार्यादीनांपूर्वयोरसमासेनोपदे
शोऽतुल्यत्वज्ञापनार्थः। तेनस्नातकायपूर्वदहरहरेवदेयः। तेनैनंपूजि
यिष्यंतोभवंतीतिवचनाद्विवाहार्थिनेचेति। राज्ञेत्वहरहरभ्याग
ताय॥ आचार्यादीनांप्रतिवत्सरोषितागतानां॥ शास्त्रोत्तरदर्श
नाद्विशेषोलब्धः। अप्रसिद्धत्वान्मधुपर्कस्वरूपमाह॥ दधनि
मध्वानीय॥ आनयतिरत्रसेचनकर्मा। आसिच्येत्यर्थः॥ स ॥१॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

र्यिवोमध्यलाभे। इदंवचनंमध्यलाभे। अप्येमेवप्रतिनिधिर्भवति
नान्यस्तैलादिरित्येवमर्थं। अस्यत्वाह्वालुःकर्मेइवेमाह। विष्टरः॰दयं
ते। विष्टरइत्यासनं। पादार्थमर्घार्थमाचमनार्थंतोदकंतथोक्तं।।
एतेषामेववचनं। एतेषामेभिर्निमित्तैर्निवेदनंयथास्याङ्गोजनस्य
माभूदिति। भोजनंचदेयमितिवक्ष्यामः। ऋत्विजोमधुपर्कदाने
द्वेगती संभवतः। पदार्थानुसमयः कांडानुसमयइति। तत्रपदार्था
नुसमयोनामसर्वेषांवर्णोत्क्रमेण विष्टरंदत्वाततःपाद्यंततोअर्घ्य
मिति। कांडानुसमयोनामएकस्यैवसर्वं विष्टरादिगोनिवेदनांतंस
माप्यततोन्यस्यसर्वंततोन्यस्येति। अथप्रतिग्रहीतुःकर्माह। अ
हंवर्ष्मे॰विशेत्। अभ्यस्यवा। पद्भ्यामाक्रम्यवाविष्टरएतयोर्विक
ल्पः। पादौप्रक्षालापयीत। दक्षिणं। यच्छेत्। पश्चात्सव्यं। कुतःअ

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3)

२ अवचनात् । सव्यं शूद्राय । अग्रे भय छेत् । पश्चाद् दक्षिणं । क्षत्रियवैश्यौ

यदा प्रक्षालयितारौ तदा सव्यं वा पूर्वं दक्षिणं वा नास्ति नियमः ॥ प्रक्षा

लितः सीति । प्रक्षालितपादग्रहणानंतरं योऽर्थं प्रक्षालनानंतरं अ

र्घ्यमेव गृह्णीयादिति । गंधमाल्यादि संयुक्तं उदकमर्घ्यमित्युच्यते

अथ शब्दस्यानंतर्यार्थः अर्घ्यानंतरमाचमनीयमेवेति ॥ तेन गं

धमाल्यादीनि परिसमाप्ते कर्मणि दातव्यानि । आचामतीत्युदकं

पिबतीत्यर्थः । अत्र शोधार्थमाचमनं भवति कुतः स्मृतेः ॥ मधुपर्के

च सोमे च अप्सु प्राणाहुतीषु च ॥ नोच्छिष्टा भवंतीति । उत्तरत्र विधा

नात् ॥ आचांतोदकाय गामिति । एवमेकेतद् युक्तं ॥ कुतः सोमे अनु

च्छिष्ट विधानात् । अत्राचमनं न प्रतिषेधति तत्र शौचार्थमाचमनं भव

तीति गम्यते । आचांतोदकवचनमन्यार्थं । मधुपर्के इति । मधुपर्के २

(3A)

माह्रियमाणमानीयमानमीक्षतेमंत्रेण । देवस्यत्वा • नमार्ष्टि । अना
मिकेतिकेचिन्मध्यमामाहुः । कुतः देशेनैवसमाख्यानंतुतस्यानाम
विद्यते । अंगुष्ठादिवत् । अन्येतुउपकनिष्ठिकामाहुः । कुतः कनिष्ठि
कायाह्यसौव्यपदिश्यते । ननुतस्यानामास्तीति । आगमाद्विशेषो
ज्ञेयः । त्र्यवेनावेक्ष्य ॥ ततः स्रुक्पाणिः कृत्वा प्रदक्षिणमोह्यवसव
स्त्वेति ॥ पुरस्तान्निमार्ष्टि ॥ अंगुलीगतंलेपमपनयतीत्यर्थः । रुद्रा
स्त्वा • दक्षिणतः ॥ आदि • पश्चात् । विश्वे • उत्तरतः । भ्रते • त्रिरुद्ध्य । मंत्रे
णमध्यात्त्रिरुद्ध्यनिमार्ष्टि । ऊर्ध्वंनिरक्षिपतीत्यर्थः । मंत्रावृत्तिरु
क्ता ॥ ततोभूमौनिधायपात्रं विराजो • तृतीयं । संख्यावचनानि
तुसर्वप्राशनपक्षेत्रिभिरेवमंत्रैर्यथासर्वंप्राशितंभवति । तथा
प्राशनीयादिष्वेवमर्थानि । एवंभाष्यकारः । अन्येत्वन्यथाव्याचक्षुः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

॥३॥ भूतेभ्यस्त्वेतिमध्याच्छिरद्गृह्यविराजोदोहोसीतिप्रथममुद्गाहंप्राश्नी
यात् विराजोदोहमितिद्वितीयंउद्गाहंमयिदोहमितितृतीयमुद्गा
हंतृतीयवचनंसर्वप्राशानपश्येत्तृतीयेनप्राशनेनयथासर्वंप्राशि
तंभवतितथाप्राश्नीयादित्ययमर्थमिति। पद्यायैविराजइत्यत्रवि
राजइतिषष्ठीकुतः पूर्वमंत्रेपाद्यस्तथात्वात्। पद्यायैइत्यपिचतु
र्थीषष्ठ्यर्थेतेनतत्सामानाधिकरण्यसत्यपिषष्ठ्येवयुक्ताकल्पयि
तुं॥ नेसर्वंप्राश्नीयात्॥ नतृप्तिंगच्छेत्॥ त्क्षिंकचनगछेत्॥ ब्राह्म
णायोदद्यु·च्छिष्टंप्रयच्छेदलाभेऽप्सु॥ ब्राह्मणायउच्छिष्टंउद्धृतादव
शिष्टमुदङ्मुखोमधुपर्कंप्रयच्छेत्॥ ब्राह्मणालाभेअप्सुनि
षिंचेत्सर्वंप्राश्नीयात्॥ अथाच०मसीति यत्तपूर्वमाचम
नीयंनिवेदितंतेनाचामतिमंत्रेण॥ सत्यंयशः०द्वितीयं॥ द्विती ॥३॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

यग्रहणंआचमनीयत्वा स्यर्थंइतरथामंत्रस्योत्तरेणसंबधस्यात् ॥
आचांतग्रहणं ॥ ऊेंाचार्थेआचमनंकृत्वाकर्मांगमप्याचमनंकुर्यो
दित्येवमर्थंउदककवचनमाचमनीयनिरस्यर्थंतेनाचमनेउदकांत
रंभवति ॥ हतोमे ० पिप्मन् ॥ इमंमंत्रंजपित्वाओंकुरुतेतिब्रूयात्द्य
द्विकारःपिप्मन् ॥ मारपिषन्नभवति ॥ तदाच दातालाभेतत
त्रेदेवताप्राणुक्ता ॥ मातारुद्रा ० लक्ष्यन् ॥ पशुत्स्रक्ष्यन् ॥ भवति
तदाएतांजपित्वा ओमुत्सृजतेतिब्रूयात् ॥ नामांसो ० भवति ॥ म
धुपर्केविभोजनअमांसभवतीत्यर्थः ॥ कुतःमांसस्यभोजनां
गत्वेनलोकेप्रसिद्धत्वात् ॥ अनेनाभ्युपायेनभोजनमप्यत्रविहि
तंभवति ॥ पशुकरणपक्षेतन्मांसेनभोजनंउत्सर्जनपक्षेमांसां
तरेण ॥ अध्यायंलक्षणार्थंद्विर्वचनमंगलार्थंच ॥ ॥ इत्याश्वलायनगृह्यविवरणे नारायणीयायांवृत्तौप्रथमोध्यायः ॥ १

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai "Joint project of the"

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com